# ॥ નક્ષત્ર સૂક્તમ ॥

**તૈત્તરીય બ્રાહ્મણ, અષ્ટકમ 3, પ્રશ્નઃ ૧**
**તૈત્તરીય સંહિતા, કાણ્ડં 3, પ્રપાઠકઃ ૫, અનુ. ૧**

ૐ ॥ અગ્નિર્નઃ પાતુ કૃત્તિકાઃ । નક્ષત્રં દેવમિન્દ્રિયમ । ઈદમાસાં વિચક્ષણમ । હવિરાસં જુહોતન । યસ્ય ભાન્તિ રશ્મયો યસ્ય કેતવઃ । યસ્યેમા વિશ્વા ભુવનાનિ સર્વા । સ કૃત્તિકાભિરભિ સંવસાનઃ । અગ્નિર્નો દેવઃ સુવિતે દધાતુ ॥ ૧ ॥

પ્રજાપતે રોહિણી વેતુ પત્ની । વિશ્વરૂપા બૃહતી ચિત્રભાનુઃ । સા નો યજ્ઞસ્ય સુવિતે દધાતુ । યથા જીવેમ શરદઃ સવીરાઃ । રોહિણી દેવ્યુદગાત્પુરસ્તાત । વિશ્વા રૂપાણિ પ્રતિમોદમાના । પ્રજાપતિગં હવિષા વર્ધયન્તી । પ્રિયા દેવાનામુપયાતુ યજ્ઞમ ॥ ૨ ॥

સોમો રાજા મૃગશીર્ષેણ આગન્ન । શિવં નક્ષત્રં પ્રિયમસ્ય ધામ । આપ્યાયમાનો બહુધા જનેષુ । રેતઃ પ્રજાં યજમાને દધાતુ । યત્તે નક્ષત્રં મૃગશીર્ષમસ્તિ । પ્રિયગં રાજન પ્રિયતમં પ્રિયાણામ । તસ્મૈ તે સોમ હવિષા વિધેમ । શન્ન એધિ દ્વિપદે શં ચતુષ્પદે ॥ 3 ॥

આર્દ્રયા રુદ્રઃ પ્રથમા ન એતિ । શ્રેષ્ઠો દેવાનાં પતિરઘ્નિયાનામ । નક્ષત્રમસ્ય હવિષા વિધેમ । મા નઃ પ્રજાગં રીરિષન્મોત વીરાન । હેતી રુદ્રસ્ય પરિણો વૃણક્તુ । આર્દ્રા નક્ષત્રં જુષતાગં હવિર્નઃ । પ્રમુઞ્ચમાનૌ દુરિતાનિ વિશ્વા । અપાઘશગંસં નુદતામરાતિમ ॥ ૪ ॥

પુનર્નો દેવ્યદિતિઃ સ્પૃણોતુ । પુનર્વસૂ નઃ પુનરેતાં યજ્ઞમ । પુનર્નો દેવા અભિયન્તુ સર્વે । પુનઃ પુનર્વો હવિષા યજામઃ । એવા ન દેવ્યદિતિરનર્વા । વિશ્વસ્ય ભર્ત્રી જગતઃ પ્રતિષ્ઠા । પુનર્વસૂ હવિષા વર્ધયન્તી । પ્રિયં દેવાનામપ્યેતુ પાથઃ ॥ ૫ ॥

બૃહસ્પતિઃ પ્રથમં જાયમાનઃ । તિષ્યં નક્ષત્રમભિ સંબભૂવ । શ્રેષ્ઠો દેવાનાં પૃતનાસુ જિષ્ણુઃ । દિશોટનુ સર્વા અભયં નો અસ્તુ । તિષ્યઃ પુરસ્તાદુત મધ્યતો નઃ । બૃહસ્પતિર્નઃ પરિપાતુ પશ્ચાત । બાધેતાં દ્વેષો અભયં કૃણુતામ । સુવીર્યસ્ય પતયઃ સ્યામ ॥ ૬ ॥

ઈદગં સર્પેભ્યો હવિરસ્તુ જુષ્ટમ । આશ્રેષા યેષામનુયન્તિ ચેતઃ । યે અન્તરિક્ષં પૃથિવીં ક્ષિયન્તિ । તે નઃ સર્પાસો હવમાગમિષ્ઠાઃ । યે રોચને સૂર્યસ્યાપિ સર્પાઃ । યે દિવં દેવીમનુ સંચરન્તિ । યેષામાશ્રેષા અનુયન્તિ કામમ । તેભ્યઃ સર્પેભ્યો મધુમજ્જુહોમિ ॥ ૭ ॥

ઉપહૂતા: પિતરો યે મઘાસુ । મનોજવસ: સુકૃત: સુકૃત્યા: । તે નો નક્ષત્ત્રે હવમાગમિષ્ઠા: । સ્વધાભિર્યજ્ઞં પ્રયતં જુષન્તામ । યે અગ્નિદગ્ધા યેઽનગ્નિદગ્ધા: । યેઽમુલ્લોકં પિતર: ક્ષિયન્તિ । યાગ્શ્ચ વિદ્મયાગં ઉ ચ ન પ્રવિદ્મ । મઘાસુ યજ્ઞગં સુકૃતં જુષન્તામ ॥ ૮ ॥

ગવાં પતિ: ફલ્ગુનીનામસિ ત્વમ । તદર્યમન વરુણમિત્ર ચારુ । તં ત્વા વયગં સનિતારગં સનીનામ । જીવા જીવન્તમુપ સંવિશેમ । યેનેમા વિશ્વા ભુવનાનિ સંજિતા । યસ્ય દેવા અનુ સંયન્તિ ચેત: । અર્યમા રાજાઽજરસ્તુ વિષ્માન । ફલ્ગુનીનામૃષભો રોરવીતિ ॥ ૯ ॥

શ્રેષ્ઠો દેવાનાં ભગવો ભગાસિ । તત્ત્વા વિદુ: ફલુગુનીસ્તસ્ય વિત્તાત । અસ્મભ્યં ક્ષત્રમજરગં સુવીર્યમ । ગોમદશ્વવદુપ સન્નુદેહ । ભગો હ દાતા ભગ ઈત્પ્રદાતા । ભગો દેવી: ફલ્ગુનીરાવિવેશ । ભગસ્યેત્તં પ્રસવં ગમેમ । યત્ર દેવૈ: સધમાદં મદેમ ॥ ૧૦ ॥

આયાતુ દેવ: સવિતોપયાતુ । હિરણ્યયેન સુવૃતા રથેન । વહન, હસ્તગં સુભગં વિદ્મનાપસમ । પ્રયચ્છન્તં પપુરિં પુણ્યમચ્છ । હસ્ત: પ્રયચ્છ ત્વમૃતં વસીય: । દક્ષિણેન પ્રતિગૃભ્ણીમ એનત । દાતારમદ્ય સવિતા વિદેય । યો નો હસ્તાય પ્રસુવાતિ યજ્ઞમ ॥ ૧૧ ॥

ત્વષ્ટા નક્ષત્રમભ્યેતિ ચિત્રામ । સુભગં સસંયુવતિગં રોચમાનામ । નિવેશયન્નમૃતાન્મર્ત્યાગંશ્ચ । રૂપાણિ પિગંશન ભુવનાનિ વિશ્વા । તન્નસ્ત્વષ્ટા તદુ ચિત્રા વિચષ્ટામ । તન્નક્ષત્રં ભૂરિદા અસ્તુ મહ્યમ । તન્ન: પ્રજાં વીરવતીગં સનોતુ । ગોભિર્નો અશ્વૈ: સમનક્તુ યજ્ઞમ ॥ ૧૨ ॥

વાયુર્નક્ષત્રમભ્યેતિ નિષ્ટ્યામ । તિગ્મશૃંગો વૃષભો રોરુવાણ: । સમીરયન ભુવના માતરિશ્વા । અપ દ્વેષાગંસિ નુદતામરાતી: । તન્નો વાયુસ્તદુ નિષ્ટ્યા શ્રુણોતુ । તન્નક્ષત્રં ભૂરિદા અસ્તુ મહ્યમ । તન્નો દેવાસો અનુજાનન્તુ કામમ । યથા તરેમ દુરિતાનિ વિશ્વા ॥ ૧૩ ॥

દૂરમસ્મચ્છત્રવો યન્તુ ભીતા: । તદિન્દ્રાગ્ની કૃણુતાં તદ્વિશાખે । તન્નો દેવા અનુમદન્તુ યજ્ઞમ । પશ્ચાત પુરસ્તાદભયન્નો અસ્તુ । નક્ષત્રાણામધિપત્ની વિશાખે । શ્રેષ્ઠાવિન્દ્રાગ્ની ભુવનસ્ય ગોપૌ । વિષૂચ: શત્રૂનપબાધમાનૌ । અપ ક્ષુધં નુદતામરાતિમ ॥ ૧૪ ॥

પૂર્ણા પશ્ચાદુત પૂર્ણા પુરસ્તાત । ઉન્મધ્યત: પૌર્ણમાસી જિગાય । તસ્યા દેવા અધિ સંવસન્તઃ । ઉત્તમે નાક ઈહ માદયન્તામ । પૃથ્વી સુવર્ચા યુવતિ: સજોષા: । પૌર્ણમાસ્યુદગાચ્છોભમાના । આપ્યાયયન્તી દુરિતાનિ વિશ્વા । ઉરુ દુહાં યજમાનાય યજ્ઞમ ॥ ૧૫ ॥

ઋધ્યાસ્મ હવ્યૈર્નમસોપસદ્ય । મિત્રં દેવં મિત્રધેયં નો અસ્તુ । અનૂરાધાન હવિષા વર્ધયન્ત: । શતં જીવેમ શરદ: સવીરા: । ચિત્રં નક્ષત્રમુદગાત્પુરસ્તાત । અનૂરાધાસ ઈતિ યદ્વદન્તિ । તન્મિત્ર એતિ પથિભિર્દેવયાનૈ: । હિરણ્યયૈ–ર્વિતતૈ–રન્તરિક્ષે ॥ ૧૬ ॥

ઈન્દ્રો જ્યેષ્ઠામનુ નક્ષત્રમેતિ । યસ્મિન વૃત્રં વૃત્ર તૂર્યે તતાર । તસ્મિન્વય–મમૃતં દુહાના: । ક્ષુધન્તરેમ દુરિતિં દુરિષ્ટિમ । પુરન્દરાય વૃષભાય ધૃષ્ણવે । અષાઢાય સહમાનાય મીઢુષે । ઈન્દ્રાય જ્યેષ્ઠા મધુમદુહાના । ઊરું કૃણોતુ યજમાનાય લોકમ ॥ ૧૭ ॥

મૂલં પ્રજાં વીરવતીં વિદેય । પરાચ્યેતુ નિર્ઋતિ: પરાચા । ગોભિર્નક્ષત્રં પશુભિ: સમક્તમ । અહર્ભૂયાદ્યજમાનાય મહ્યમ । અહર્નો અદ્ય સુવિતે દધાતુ । મૂલં નક્ષત્રમિતિ યદ્વદન્તિ । પરાચીં વાચા નિર્ઋતિં નુદામિ । શિવં પ્રજાયૈ શિવમસ્તુ મહ્યમ ॥ ૧૮ ॥

યા દિવ્યા આપ: પયસા સમ્બભૂવુ: । યા અન્તરિક્ષ ઉત પાર્થિવીર્યા: । યાસા–મષાઢા અનુયન્તિ કામમ । તા ન આપ: શગ્ગ સ્યોના ભવન્તુ ।  યાશ્ચ કૂપ્યા યાશ્ચ નાદ્યાસ્સમુદ્રિયા: । યાશ્ચ વૈશન્તીરુત પ્રાસચીર્યા: । યાસામષાઢા મધુ ભક્ષયન્તિ । તા ન આપ: શગ્ગ સ્યોના ભવન્તુ ॥ ૧૯ ॥

તન્નો વિશ્વે ઉપ શ્રુણ્વન્તુ દેવા: । તદષાઢા  અભિસંયન્તુ યજ્ઞમ । તન્નક્ષત્રં પ્રથતાં પશુભ્ય: । કૃષિર્વૃષ્ટિ–ર્યજમાનાય કલ્પતામ । શુભ્રા: કન્યા યુવતય: સુપેશસ: । કર્મકૃત: સુકૃતો વીર્યાવતી: । વિશ્વાન દેવાન, હવિષા વર્ધયન્તી: । અષાઢા: કામમુપયાન્તુ યજ્ઞમ ॥ ૨૦ ॥

યસ્મિન બ્રહ્માભ્યજયત્સર્વમેતત । અમુગ્ચ લોક–મિદમૂચ સર્વમ । તન્નો નક્ષત્ર–મભિજિદ્વિજિત્ય । શ્રિયં દધાત્વહૃણીયમાનમ । ઉભૌ લોકૌ બ્રહ્મણા સઞ્જિતેમૌ । તન્નો નક્ષત્રમભિજિદ્વિચષ્ટામ । તસ્મિન્વયં પૃતના: સંજયેમ । તન્નો દેવાસો અનુજાનન્તુ કામમ ॥ ૨૧ ॥

શ્રુણ્વન્તિ શ્રોણા–મમૃતસ્ય ગોપામ । પુણ્યામસ્યા ઉપશ્રુણોમિ વાચમ । મહીં દેવીં વિષ્ણુપત્ની–મજૂર્યામ । પ્રતીચી મેનાગં હવિષા યજામઃ । ત્રેધા વિષ્ણુ–રુરુગાયો વિચક્રમે । મહીં દિવં પૃથિવી–મન્તરિક્ષમ । તચ્છ્રોણૈતિશ્રવ–ઈચ્છમાના । પુણ્યગ્ગ શ્લોકં યજમાનાય કૃણ્વતી ॥ ૨૨ ॥

અષ્ટૌ દેવા વસવઃ સોમ્યાસઃ । ચતસ્ત્રો દેવી–રજરાઃ શ્રવિષ્ઠાઃ । તે યજ્ઞં પાન્તુ રજસઃ પરસ્તાત । સંવત્સરીણ–મમૃતગ્ગ સ્વસ્તિ । યજ્ઞં નઃ પાન્તુ વસવઃ પુરસ્તાત । દક્ષિણતોઽભિયન્તુ શ્રવિષ્ઠાઃ । પુણ્યન્નક્ષત્રમભિ સંવિશામ । મા નો અરાતિ–રઘશગંસાઽગન્ન ॥ ૨૩ ॥

ક્ષત્રસ્ય રાજા વરુણોઽધિરાજઃ । નક્ષત્રાણાગં શતભિષગ્વસિષ્ઠઃ । તૌ દેવેભ્યઃ કૃણુતો દીર્ઘમાયુઃ । શતગં સહસ્ત્રા ભેષજાનિ ધત્તઃ । યજ્ઞન્નો રાજા વરુણ ઉપયાતુ । તન્નો વિશ્વે અભિ સંયન્તુ દેવાઃ । તન્નો નક્ષત્રગં શતભિષગ્જુષાણમ । દીર્ઘમાયુઃ પ્રતિરદ્ભેષજાનિ ॥ ૨૪ ॥

અજ એકપાદુદગાત્પુરસ્તાત । વિશ્વા ભૂતાનિ પ્રતિમોદમાનઃ । તસ્ય દેવાઃ પ્રસવં યન્તિ સર્વે । પ્રોષ્ઠપદાસો અમૃતસ્ય ગોપાઃ । વિભ્રાજમાનઃ સમિધાન ઉગ્રઃ । આઽન્તરિક્ષમરુહદગન્દ્યામ । તગં સૂર્યં દેવ–મજમેકપાદમ । પ્રોષ્ઠપદાસો અનુયન્તિ સર્વે ॥ ૨૫ ॥

અહિર્બુધ્નિયઃ પ્રથમા ન એતિ । શ્રેષ્ઠો દેવાનામુત માનુષાણામ । તં બ્રાહ્મણાઃ સોમપાઃ સોમ્યાસઃ । પ્રોષ્ઠપદાસો અભિરક્ષન્તિ સર્વે । ચત્વાર એકમભિ કર્મ દેવાઃ । પ્રોષ્ઠપદા સ ઈતિ યાન, વદન્તિ । તે બુધ્નિયં પરિષદ્યગ્ગ સ્તુવન્તઃ । અહિગં રક્ષન્તિ નમસોપસદ્ય ॥ ૨૬ ॥

પૂષા રેવત્યન્વેતિ પન્થામ । પુષ્ટિપતી પશુપા વાજબસ્ત્યૌ । ઈમાનિ હવ્યા પ્રયતા જુષાણા । સુગૈર્નો યાનૈરુપયાતાં યજ્ઞમ । ક્ષુદ્રાન પશૂન રક્ષતુ રેવતી નઃ । ગાવો નો અશ્વાગં અન્વેતુ પૂષા । અન્નગં રક્ષન્તૌ બહુધા વિરૂપમ । વાજગં સનુતાં યજમાનાય યજ્ઞમ ॥ ૨૭ ॥

તદશ્વિનાવશ્વયુજોપયાતામ । શુભં ગમિષ્ઠૌ સુયમેભિરશ્વૈઃ । સ્વં નક્ષત્રગં હવિષા યજન્તૌ । મધ્વા સંપૃક્તૌ યજુષા સમક્તૌ । યૌ દેવાનાં ભિષજૌ હવ્યવાહૌ । વિશ્વસ્ય દૂતા–વમૃતસ્ય ગોપૌ । તૌ નક્ષત્રં જુજુષાણોપયાતામ । નમોઽશ્વિભ્યાં કૃણુમોઽશ્વયુગ્ભ્યામ ॥ ૨૮ ॥

અપ પાપ્માનં ભરણીર્ભરન્તુ । તદ્યમો રાજા ભગવાન, વિચષ્ટામ । લોકસ્ય રાજા મહતો મહાન, હિ । સુગં નઃ પન્થામભયં કૃણોતુ । યસ્મિન્નક્ષત્રે યમ એતિ રાજા । યસ્મિન્નેન-મભ્યષિઞ્ચન્ત દેવાઃ । તદસ્ય ચિત્રગં હવિષા યજામ । અપ પાપ્માનં ભરણીર્ભરન્તુ ॥ ૨૯ ॥

નિવેશની સઙ્ગમની વસૂનાં વિશ્વા રૂપાણિ વસૂન્યાવેશયન્તી । સહસ્ર-પોષગં સુભગા રરાણા સા ન આગન્વર્ચસા સંવિદાના । યત્તે દેવા અદધુર્ભાગધેયમમાવાસ્યે સવસન્તો મહિત્વા । સા નો યજ્ઞં પિપૃહિ વિશ્વવારે રયિન્નો ધેહિ સુભગે સુવીરમ ॥ ૩૦ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

www.YouSigma.com